श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २०

*ऋषभयोगीश्वरचरितवर्णनम्*

प्रियव्रतस्य प्रियपुत्रभूतादाग्नीध्रराजादुदितो हि नाभिः।
त्वां दृष्टवानिष्टदमिष्टिमध्ये तवैव तुष्ट्यै कृतयज्ञकर्मा॥ १ ॥

अभिष्टुतस्तत्र मुनीश्वरैस्त्वं राज्ञः स्वतुल्यं सुतमर्थ्यमानः।
स्वयं जनिष्येऽहमिति ब्रुवाणस्तिरोदधा बर्हिषि विश्वमूर्ते॥ २ ॥

नाभिप्रियायामथ मेरुदेव्यां त्वमंशतोऽभूरृषभाभिधानः।
अलोकसामान्यगुणप्रभावप्रभाविताशेष जनप्रमोदः॥ ३ ॥

त्वयि त्रिलोकीभृति राज्यभारं निधाय नाभिः सह मेरुदेव्या।
तपोवनं प्राप्य भवन्निषेवी गतः किलानन्दपदं पदं ते॥ ४ ॥

इन्द्रस्त्वदुत्कर्षकृतादमर्षाद्ववर्ष नास्मिन्नजनाभवर्षे।
यदा तदा त्वं निजयोगशक्त्या स्ववर्षमेनद्व्यदधाः सुवर्षम्॥ ५ ॥

जितेन्द्रदत्तां कमनीं जयन्तीमथोद्वहन्नात्मरताशयोऽपि।
अजीजनस्तत्र शतं तनूजानेषां क्षितीशो भरतोऽग्रजन्मा॥ ६ ॥

नवाभवन् योगिवरा नवान्ये त्वपालयन् भारतवर्षखण्डान्।
सैका त्वशीतिस्तव शेषपुत्रास्तपोबलात् भूसुरभूयमीयुः॥ ७ ॥

उक्त्वा सुतेभ्योऽथ मुनीन्द्रमध्ये विरक्तिभक्त्यान्वितमुक्तिमार्गम्।
स्वयं गतः पारमहंस्यवृत्तिमधा जडोन्मत्तपिशाचचर्याम्॥ ८ ॥

परात्मभूतोऽपि परोपदेशं कुर्वन् भवान् सर्वनिरस्यमानः।
विकारहीनो विचचार कृत्स्नां महीमहीनात्मरसाभिलीनः॥ ९ ॥

शयुव्रतं गोमृगकाकचर्यां चिरं चरन्नाप्य परं स्वरूपम्।
दवाहृताङ्गः कुटकाचले त्वं तापान् ममापाकुरु वातनाथ॥ १० ॥

**********